Book-Post

21

To,

If not delivered
please return to :

EDITOR,
THE VEDIC PATH,
P.O. Gurukul Kangri,
(U.P.) 249404.

॥६०॥ स्वस्ति श्री गणपतये नमः॥ गणेशं प्रणम्य जेन कृता सारमुद्धृत्य सर्वतः। रूपचंद्रेण ग्र
थिता टीका तत्त्वप्रकाशिनी॥१॥ कश्चित्कांताविरहगुरुणा स्वाधिकारप्रमत्तः शापे
नास्तं गमितमहिमा वर्षभोग्येन भर्तुः॥ यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु स्नि
ग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥१॥ कश्चित् अनिर्दिष्टः अकथितनामयक्षः रामगि
र्याश्रमेषु वसतिं निवासं चक्रे चकार॥ रामगिरिः दंडकारण्यपर्वतस्तस्य आश्रमाः तेषु कथंभूतो
स्वाधिकार यक्षः स्वस्यासौ अधिकारः कमलानयनरूपः तत्र प्रमत्तः अनवहितः असावधानः केन प्रम
त्तः भर्तुः कुबेरस्य शापेन कथंभूतेन शापेन वर्षं यावत् भुज्यत इति वर्षभोग्यस्तेन पुनः
कथंभूतेन शापेन कांतयाः विरहा वियोगः तेन गुरुः गरिष्ठः तेन पुनः कथंभूतो यक्षः
अस्तं गमितो महिमा माहात्म्यं यस्य सः कथंभूतेषु रामगिर्याश्रमेषु जनकस्य राज्ञः त
नया पुत्री सीता तस्याः स्नानं तेन पुण्यानि पवित्राणि उदकानि जलानि येषु तेषु आश्रमे
षु पुनः कथंभूतेषु रामगिर्याश्रमेषु स्निग्धच्छायातरुषु छायायुक्तास्तरवः छायातरवः

सं०टी

टि

यक्षः तस्मिन् अद्रौ रामगिरौ मेघं ददर्श अद्राक्षीत् ॥ किं कृत्वा ॥ कतिचित् अष्टौ मासान् नीत्वा
अतिवाह्य ॥ कथंभूतो यक्षः ॥ अबलया स्त्रिया विप्रयुक्तः रहितः ॥ स्त्रीविप्रयुक्तः ॥ पुनः की
दृशः यक्षः ॥ कामी कामोस्यास्तीति कामी विषयी ॥ पुनः कीदृशः यक्षः ॥ कनकवलयभ्रंश
रिक्तप्रकोष्ठः ॥ कनकस्य स्वर्णस्य वलयानि वाहुभूषणानि तेषां भ्रंशः पतनं तेन रिक्तः प्रको
ष्ठः कलाचिकाप्रदेशो यस्य सः ॥ विरहाधिना कृशतामापन्नस्य वलयं पतत् कनकरूपने
नास्य यक्षस्य श्रीमत्त्वमुक्तं कदा मेघं ददर्श आषाढस्य प्रथमदिवसे शुक्लप्रतिपदि कथंभूतं मे
घं आश्लिष्टसानुं आश्लिष्टानि आलिंगितानि सानूनि शिखराणि येन मेघेन सतं पुनः कथंभू
तं मेघं वप्रक्रीडापरिणतगज ॥ वप्रस्तटं तत्र या क्रीडा तस्यां क्रीडायां परिणतः तिर्यक्दत्तप्रहा
रो यो गजः तद्वत् प्रेक्षणीयः तं ॥ उपमालंकारः ॥२॥ मूल॥ तस्य स्थित्वा कथमपि पुरः केतकाधा
न हेतोः अंतर्वाष्पश्चिरमनुचरो राजराजस्य दध्यौ मेघालोके भवति सुखिनोप्यन्यथावृत्ति चेतः
कंठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥३॥ टी॥ राजराजस्य कुवेरस्यानुचरः सेवकः यक्षः
चिरं चिरकालं दध्यौ चिंतयामास किं कृत्वा तस्य मेघस्य पुरः अग्रे कथमपि महता कष्टेन स्थित्वा
स्थितो भूत्वा ॥ कथंभूतस्य मेघस्य ॥ केतकाधानहेतोः ॥ केतकानां केतकीकुसुमानां

स्निग्धाऽस्तूनाबामरसपल्लवाः छायायेषां तेईदृग्विधातरवः वृक्षायेषु ते तेषु अयमर्थः येषु आश्र
मेषु रामो वर्त्तते तत्र सामर्थ्यातिशयेन छायामानं ऽयेति न गच्छति। तदुक्तं रघुवंशे प्रभावस्तंभि
त छायमिति अत्र विचार्यते प्रमत्तः कथंपूर्वसंप्रा कथायां उक्तमस्तिकमलकलिकाकुद्धिपूर्वं आ
नीता इति कथं सत्यं तथापि सामुद्धिरेव न भवति कुतः कामक्रांतकारित्वात् ऽनवधानं एततत्र
त्यंचेरामसन्नानेनपुरोपादकत्वंपरित्यज्यजनकतनयायाः ग्रहसांकित्सर्थकृतंतत्राह ननु ऋज्ञा
रोव्यंअपः किंच रामोपलक्षितो गिरिः रामगिरिः इति समासः कथं कृतं ॥ तत्राह ॥ कदाचित् संबंधं
वि. उपलक्षणं भवति यथा काकोपलक्षितं गृहं देवदत्तगृहं सर्वदा संबंधविशेषणं यथार
क्तपटः ॥ अतो रामस्य पर्वतेन सर्वत्र सर्वदा संबंधो न भवति किंतु कदाचित् आसीत् इति
किंच आश्रमेषु इति बहुवचनं कथं सर्वदा संबंधो नास्ति अरति उद्वेतस्य युक्तस्य एकत्र
दू अवस्थातुं अशक्यत्वात् इति भावः विरहाधिक्यद्योतनमिति ऽस्यत् सर्वं सुस्थं ॥१॥ तस्मि
न्नद्रौ कतिचिद् अबलाविप्रयुक्तः स कामी नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः ॥ आ
षाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥२॥ स

प्राप्याः पटुकरणैः अविकलेंद्रियैः प्राणिभिः प्रापणीयाः नेतव्याः धूमश्च ज्योतिश्च सलिलं च मरु
च्च ते धूमज्योतिःसलिलमरुतः तेषां संनिपातः [illegible] ऽलंकारः ॥५॥ जातं वंशे भुवनविदिते पुष्करावर्त
कानां जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः तेनार्थित्वं त्वयि विधिवशाद्दूरबंधुर्गतो हं
यांचा मोघा वरमधिकगुणे नाधमे लब्धकामा ॥६॥ हे घ तेन कारणेन त्वयि ऽर्थित्वं ऽर्थिनो भावं
ऽहं गतः प्राप्तः ॥ याचकत्वं प्राप्तः यतः पुष्करावर्तकानां ॥ पुष्करं जलं पृथिव्यामावर्तयंति भ्रामयंति पुष्करा
वर्तकाः तेषां वंशे ऽन्वये जातं उत्पन्नं त्वां जानामि अवैमि यतो वंशजाता अर्थिनो दुःखं जानंति कथं
भूते ऽन्वये भुवने चतुर्दशभुवने विदिते ख्याते तस्मिन्नन्वये उत्पन्नं त्वां मघोनः इंद्रस्य प्रकृ
तिपुरुषं मंत्रिपुरुषं कथंभूतं पुरुषं कामरूपं स्वेच्छया कृतरूपं । कथंभूतो ऽहं । विधिवशात्
दैवपारतंत्र्यात् दूरबंधुः । दूरे बंधुः स्त्री यस्य सो दूरबंधुः यस्याः दूरं गता दैववशात् । भो मेघ
प्रार्थनायोग्यः । अधिकगुणे मोघा निःफला याञ्चा प्रार्थना वरं श्रेष्ठा ॥ अधमे निर्गुणे लब्ध
कामो वांछा यस्याः सा लब्धकामापि याञ्चा न वरं न श्रेष्ठा ॥ अर्थांतरन्यासो ऽलंकारः ॥६॥ मूल ॥ सं
तप्तानां त्वमसि शरणं तत्पयोद प्रियायाः संदेशं मे हर धनपतिक्रोधविश्लेषितस्य ॥ गंतव्या ते
वसतिः ऽलकानाम यक्षेश्वराणां बाह्योद्यानस्थितहरशिरश्चंद्रिकाधौतहर्म्या ॥७॥ टिका

मे०टी० यदर्थं स्तुतिपूर्वं तं मेघं चंद्रशालातरु कथा द्वारेणाह भो पयोद जलद मम प्रियायाः ततः संदेशं वाक्यं ५
॥ ६ ॥ हर प्रापय गत एव देशांतरं संदेशप्रापणं नियोजोऽचितः योग्यः ॥ कुतः ॥ भो मेघ संतप्तानां शरणं
त्वमसि आश्रयो भवसि ॥ ये संतप्ता भवंति तान् देहपयसा पुष्णाति भवान् अतः पयोद एव बोध
उ०॥४ नंतव युक्तं कथंभूतस्य मे ॥ धनपति क्रोध विश्लेषितस्य ॥ धनपतेः कुबेरस्य क्रोधः तेन विश्ले
षितः पातितः तस्य ॥ अत एव भो मेघ यक्षेश्वराणां अलका नाम वसतिः स्थानं ते त्वया गंतव्यं मे घय
ह्रिजानामितत्वंतः ॥ ज्ञापयति यक्षः ॥ यत्रालकाति इति तत्र बहुतराय धनास्तिष्ठंति यक्षेव कुलक
ल यनेनालकायाः पृथुत्वकथनं विस्तारकथनं ॥ तत्र मम गृहं मेघ एतेनालकायाः दर्शनं कुरु
हलं च ॥ यत्र इंदुमौलिः रुद्रः कथंभूताऽलका ॥ बाह्योद्यानस्थितहरशिरश्चंद्रिकाधौतहर्म्या
बहिर्भवं बाह्यं बाह्यं यत उद्यानं उपवनं तत्र स्थितो यो हरः तस्य शिरसि या चंद्रिका चंद्रज्योत्स्ना
तया धौतानि धवलितानि हर्म्याणि गृहाणि यस्यां सा अत्र हेतुरलका ॥ ७ ॥ कृतं ॥ त्वामारूढं राम
तया धौतानि धवलितानि हर्म्याणि ... पेक्षिष्यंते पथिकवनिताः प्रत्ययादाश्वसंत्यः कः संनद्धे विरह
पवनपदवीमुद्गृहीतालकांताः प्रेक्षिष्यंते पथिकवनिताः प्रत्ययादाश्वसंत्यः ॥ ८ ॥ टिका ॥ अत्र जगति
विधुरां त्वय्युपेक्षेत जायां न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥ ८ ॥ आकाशमार्गमारूढं पथिकवनिताः पाथ
प्ररोचनां उत्पादयति भो मेघ भवंतं त्वां पवनपदवीं आकाशमार्गं आरूढं पथिकवनिताः पाथ

रत्नछायानां पद्मरागादिमणिप्रभाणां व्यतिकरो मिश्रणमिव प्रेक्ष्यं दर्शनीयं आखंडलस्येंद्र
स्य धनुः खंडमेतत् एतदिति हस्तनिर्देशे विवक्षितः पुरस्तादग्रे वल्मीकाग्रात् वामलूरविवरा
त् वामलूरश्च नाकुश्च वल्मीकं पुनपुंसकमित्यमरः प्रभवत्याविर्भवति येन धनुःखंडेन ते त

रत्नछायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ताद्वल्मीकाग्रात्प्रभवति धनुःख
डमाखंडलस्य येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते बर्हेणेव स्फुरि
तरुचिना गोपवेषस्य विष्णोः ॥१५॥

व श्यामं वपुः स्फुरितरुचिना उज्ज्वलकांतिना बर्हेण पिच्छेन बर्हं पिच्छं नपुंसके इत्यमरः
गोपवेषस्य विष्णोः कृष्णस्येत्यर्थः श्यामं वपुरिवातितुरां कांतिं शोभामापत्स्यते प्राप्स्य
ति ॥१५॥

मे. टी.
८

ला २

त्वयीति वृष्टेर्दत्तकर्मणः फलमप्यं त्वयि अधिकरणत्वविवक्षायां सप्तमी आयत्तो निघ्न आ
पन्न इत्यमरः इति हेतोः प्रीत्या स्निग्धैः अकृत्रिमप्रेमार्द्रैरित्यर्थः भ्रूविकाराणां भ्रूविलासानामन
भिज्ञैः ग्रामत्वादिति शेषः जनपदवधूनां पल्लीयोषितां लोचनैः पीयमानः सन् अतितृष्णया वि
रीक्ष्यमाणः सन् मालं मालाख्यं क्षेत्रं सीरेण प्रापमुत्कलस्थलं मालमुंडितभूतलमित्युज्ज्वलः स
द्यस्तत्कालमेव सीरैर्लांगलैरुत्कर्षणेन कर्षणेन सुरभि घ्राणतर्पणं यथा तथा गत्वेत्याभिहि

त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः प्रीतिस्निग्धैर्जनपदवधूलोचनैः पी
यमानः सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं किंचित्पश्चाद्व्रज लघुगतिर्भू
य एवोत्तरेण ॥१६॥

ष्टेत्यर्थः सुरभिर्घ्राणतर्पण इत्यमरः किंचित्पश्चाद्व्रज गच्छ लघुगतिस्तत्र निर्वृष्टत्वात् क्षिप्र
गमनः सन् लघुक्षिप्रमरं द्रुतमित्यमरः भूयः पुनरपि उत्तरेणैवोत्तरेणेत्यनुषंगः तृतीयावि
धाने प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया यथा कश्चिद्वक्रवक्ष्यमाणपतिः कुत्रचित्क्षेत्रे क
लत्रे गूढं दृष्ट्वा क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोरिति विश्वः दाक्षिण्यभंगभयाल्लीव
रमार्गेणैव २

आम्राश्चूताः कूटेषु शिखरेषु यस्य आम्रकूटो नाम सानुमान्पर्वतः आम्रश्चूतो रसालः कूटोस्त्री।
शिखरं शृंगमित्यमरः आसारो धारावृष्टिः धारासंपात आसारः इत्यमरः तेन प्रशमितो वनोपप्लवो दवा
ग्निर्येन तं कृतोपकारमित्यर्थः अध्वश्रमेण परिगतं व्याप्तं त्वां साधु सम्यक् मूर्ध्ना वक्ष्यति वोढा वहेस्तृन्
या हि सूक्ष्मकृपणेऽपि क्षुद्रो दरिद्रे कृपणे नृशंसे इति यादवः संश्रयाय संश्रयणाय मित्रे सखौ अथ मित्रं

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः न क्षुद्रो
ऽपि प्रथमसुकृतापेक्षया संश्रयाय प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥१७॥ ॥

सखा सुहृदित्यमरः प्राप्ते आगते सति प्रथमसुकृतापेक्षया पूर्वोपकारपर्यालोचनया विमुखो
न भवति यस्तथोच्चैः तेन प्रकारेणोच्चैरुन्नतः स आम्रकूटः किं पुनः विमुखो न भवतीति किमु वक्त
व्यमित्यर्थः एतेन प्रथमावसथे सौख्यलाभात्कार्यसिद्धिरस्तीति सूचितं प्रथमावसथय
स्य सौख्येन स्यात् खिन्ने ध्वनि शुभं भवति यात्रायामन्यथा त्वशुभं ध्रुवमिति ॥१७॥ ॥४

मे॰ टी॰ १० हे मेघ परिणतैः परिणतैः परिपक्वैः फलैर्द्योतिनन इति तथोक्तैः आषाढे वनचूताः फलन्ति पच्यन्ते च
मेघवातेनेत्याशयः काननाम्रैर्वनचूतैः छन्नोपान्त आवृतपार्श्वोऽचलः आम्रकूटाद्रिः स्निग्धवे
णीसवर्णे मसृणकेशबंधच्छायेश्यामवर्णे इत्यर्थः वेणी तु केशबंधे जलस्रुताविति यादवः त्व
यि शिखरं शृंगमारूढे सति यस्य च भावेन भावलक्षणमिति सप्तमी मध्ये श्यामः शेषमध्यादन्य

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रैस्त्वय्यारूढे शिखरमचलः स्निग्धवे २
णीसवर्णे नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः॥१८॥

त्र विस्तारे परितः पांडुः हरिणः हरिणः पांडुरः पांडुरित्यमरः भुवः स्तन इवामरमिथुनानां स्व रम॰
वरमणमिति भावः प्रेक्षणीयां दर्शनीयामवस्थां नूनं यास्यति मिथुनग्रहणं कामिनामेव स्तनत्वे १०
न्प्रेक्षासंभवतीति कृतं यथा पथिकांतः कश्चित्कामी कामिनीकुचकलशे विश्रांतः स्वपिति त
द्वावानपि भुवो नायिकास्तन इति ध्वनिः॥१८॥

विदन्तीति विदाः इगुपधलक्षणः कप्रत्ययः उदकसः स्थानस्य विदाः ओंकारेण तेषु घोदशादित्वा।
त्साधुः उदयनस्य वत्सराजस्य कथानां वासवदत्ताहरणादिवृत्तान्तप्रख्यानानां कोविदास्तत्त्वज्ञा
स्तेषु ये वृद्धास्तेषु ये सुतान् अवन्ती नाम जनपदान् प्राप्य तत्र पूर्वोद्दिष्टां पूर्वोक्तां सौधोत्संगप्र
णयविमुखो मा स्म भूरुज्जयिन्या इत्युक्तामित्यर्थः श्रीविशालां सम्पद्युक्तां शोभासम्पत्तिपरा
सुतलक्ष्मीः श्रीस्त्रिवर्गसम्पत्तिशोभासु इति शाश्वतः विशाला पुरीमुज्जयिनी विशालोज्जयिनी समा इत्य
मरः अनुसर व्रज कथमिव स्थितां सुचरितफले पुण्यफले स्वर्गोपभोगजनके गस्वल्पीभू

प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान् पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां वि
शालां स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां शेषैः पुण्यैर्हृतमिव दिवः कान्ति
मत्खण्डमेकं ॥३१॥

तेऽल्पावशिष्टे सतीत्यर्थः गां भुवं गतानां गौरिला कुंभिनी क्षमेत्यमरः पुनरपि भूलोकभाजा
मित्यर्थः स्वर्गिणां स्वर्गवतां जनानां शेषैः पुण्यैः सुकृतैः हृतमानीतं स्वर्गार्थानुष्ठितकर्मशे
षाणां स्वर्गदानावश्यंभावादिति भावः कान्तिरस्यास्तीति कान्तिमद् उज्ज्वलं सारभूतमित्यर्थः
एवंभूतां दन्यत्र एके मुख्यान्यकेवलाः इत्यमरः दिवः स्वर्गस्य खण्डमिव स्थितामित्युत्प्रे
क्षा एतेनातिक्रान्तसकलभूलोकनगरसौभाग्यसारत्वमुज्जयिन्या व्यज्यते ॥३१॥ ॥

यां१

मे०टी० १७ यत्र विशालायां प्रत्यूषेषु प्रत्यूषः प्रत्युषो ऽहर्मुखं कल्यमुषः प्रत्युषसी अपीति विश्वः पटु यथा स्फुटं मदकलं मदेना
व्यक्तमधुरं ध्वनितो नु मधुरा स्फुटे कलं इत्यमरः सारसानां पक्षिविशेषाणां सारसो मैथुनी कामी
गोनर्दः पुष्कराह्वय इति यादवः यद्वा सारसानां हंसानां चक्राङ्गः सारसो हंस इति शाश्वतः
कूजितं रुतं दीर्घीकुर्वन् संभावयन् इत्यर्थः यावल्लतां शाखानुवर्तिनीति भावः एतेन प्रियामाश्वा
सयन् चाटुवाक्यानुसारिकीडा प्रतिकूजितं दीर्घीकुर्वन्नविच्छिन्नान् कुर्वन्निव गम्यते स्फुटि
तानां विकसितानां कमलानामामोदेन परिमलेन सह मैत्र्या संसर्गेण कषायः सुरभिः
रागद्रव्यकषायो स्त्री निर्यासे सौरभे रसे इति यादवः अन्यत्र विमर्दगन्धीत्यर्थः विमर्दीत्ये
दीर्घीकुर्वन्पटु मदकलं कूजितं सारसानां प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ३२
परिमलो गंधे जनमनोहरे आमोदः सोतिनिर्हारी इत्यमरः अङ्गानुकूलः मांद्यात्सुखस्पर्शः अन्यत्र
गाढालिंगनदत्तगात्रसंवाहन इत्यर्थः भवभूतिना चोक्तं अशिथिलपरिरंभैर्दत्तसंवाहनानीति
संवाहनं चरणैश्चांताः प्रियः यतः कविरिव वदति संभोगान्ते मम समुचितो हस्तसंवाहनाय
नितिशिप्रा नाम काचिन्नदी तस्या नदीस्था वातः शिप्रावातः शिप्रा प्रहरत्या श्रोत्यघोत्तमार्थे प्रार्थना
सुरतयाच्ञा तत्र चाटूनि करोतीति स तथोक्तः पुनः सुरतार्थं प्रियः वचः प्रयाक्तेत्यर्थः कर्मा
ण्यण् प्रियतमो वल्लभ इव स्त्रीणां सुरतग्लानिं पूर्वरतखेदं हरति नुदति चाटूक्ति मर्वि
स्मृत पूर्वखेदाः स्त्रियः प्रियप्रार्थनां सफलयंतीति भावः प्रार्थनाचाटुकारः एवं डितानुन

रतः परं श्लोकद्वयमपि श्लोकत्रयं व्याख्यायते यस्यां विशालायां कोटिशो विपणिषु पण्यवीथिकासु रचि
तान्स्थापितान् विपणिः पण्यवीथिकेत्यमरः इदं च विशेषणं यथालिंगं सर्वत्र संबध्यते तारान् शुद्धान् हा
रान् मुक्ताहिंस शुद्धे तारस्तु मौक्तिक इत्यमरः तरलगुटिकान् मध्यमणिभूतमहारत्नानि तरलो हार
मध्यग इत्यमरः पिंडे मणौ महारत्ने गुटिका वटपा इति शाश्वतः एवं हारान् मुक्तावलीन् तथा कोटिशो

॥ हारांस्तारांस्तरलगुटिकान्कोटिशः शङ्खशुक्तीः शष्पश्यामान्मरकतमणीनुन्म
यूखप्ररोहान् दृष्ट्वा यस्यां विपणिरचितान्विद्रुमाणां च भङ्गान्संलक्ष्यन्ते सलिलनि
धयस्तोयमात्रावशेषाः ॥३३॥

न तरः शंखाश्च शुक्तयो मुक्तास्फोटाश्च शंखशुक्तीः मुक्तास्फोटः स्त्रियां शुक्तिः शंखः स्यात्कंबु
रस्त्रियामित्यमरः शष्पं बालतृणं तद्वच्छ्यामान् शष्पं बालतृणं घासो यवसं तृणमर्जुनमित्यमरः
उन्मयूखप्ररोहान् उत्कटरश्मिकिरणान् मरकतमणीन् गारुडरत्नानि तथा विद्रुमाणां भंगान् प्रवा
लखंडांश्च दृष्ट्वा सलिलनिधयः समुद्राः तोयमात्रमवशेषो येषां ते तथोक्ताः संलक्ष्यन्ते तथा
नुमीयन्त इत्यर्थः रत्नाकरादप्यतिनिःशेषितरत्नसंपद्भिरिति भावः ॥३३॥ ॥ श्री ॥

मे. टी.
१८

अत्र प्रदेशे वत्सराजो वत्सदेशाधीश्वर उदयनः प्रद्योतस्य तन्नाम्नः उज्जयिनीनायकस्य राज्ञः प्रियदुहितरं
वासवदत्तां जहार अत्र स्थलेन तस्यैव राज्ञः प्रद्योतस्यैव हैमं सौवर्णं तालद्रुमवनमभूत् अत्र नलगिरिनाम
शक्रदत्तः करी गजो दर्पान्मदात् स्तंभमालानमुत्पाट्य उद्भ्रान्त उद्भ्रान्तः उत्पत्य भ्रमणं कृतवान् इतीत्थं
भूताभिः कथाभिरित्यर्थः अभिज्ञः पूर्वोक्तकथाकोविदो जनः आगन्तून् देशान्तरादागतान् स्वसितनिजमित्रा
दिना उदयनादिकस्तु अत्र भवतः बन्धून् यत्र विशालायां रमयति विनोदयति अत्र भाविकोऽलंकारः तदुक्तं
अतीतानागतं यत्र प्रत्यक्षत्वेन लक्ष्यते अत्यद्भुतार्थकथनाद्भाविकं तदुदाहृतमिति॥३४॥ यत्र विशालायां वा
हा हयाः पत्रश्यामाः पलाशवर्णाः अत एव दिनकरहयस्पर्धिनः वर्णतो वेगतश्च सूर्याश्वकल्पाः तथा

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः अत्रोद्भ्रान्तः किल
नलगिरिः स्तम्भमुत्पाट्य दर्पादित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः॥३४॥ पत्रश्यामा दिन
करहयस्पर्धिनो यत्र वाहाः शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः प्रभेदात् योधाग्रण्यः प्रतिदशमुखं

शैलोदग्राः शैलवदुन्नताः करिणः प्रभेदात् मदस्रावाद्धेतोः त्वमिव वृष्टिमन्तः अग्रे नयतीत्यग्रण्यः सत्सू
द्विषेत्यादिना क्विप् अग्रग्रामाभ्यां नयतेर्णो वक्तव्य इति णत्वं योधाग्रण्यो भटश्रेष्ठाः संयुगे युद्धे
प्रतिदशमुखं रावणं प्रति तस्थिवांसः स्थितवन्तः अत एव चन्द्रहासव्रणाङ्काः रावणासिक्षत
चिह्नैः चन्द्रहासो रावणासिः सावधिमात्रेऽपि वक्ति विदिति शाश्वतः प्रत्यादिष्टाभरणरुचयः प्रतिषि
द्धभूषणकान्तयः शौर्यप्रकाशा एव वीराणामाभरणमिति भावः अत्रापि भाविकोऽलंकारः तदुक्तं॥३५॥

जालोद्गीर्णैः गवाक्षमार्गनिर्गतैः जालं गवाक्ष आनाये जालके कपटे गणे इति यादवः केशसंस्कारधूपैः केशसं
स्कारस्य धूपैः वनिताकेशवासनार्थं गंधद्रव्यधूपैरित्यर्थः अत्र संस्कारधूपयोरपि तादर्थ्येपि यूपदार्वादिवत्प्रकृति
विकारभावाभावादश्वघासादिवत्षष्ठीसमासेन चतुर्थीसमासः उपचितवपुः परिपुष्टशरीरः इत्यर्थे निर्विकार
रीरः वधौ बंधुरिति वा प्रीत्या बंधुप्रीत्या भवनशिखिभिः गृहमयूरैर्दत्तनृत्यमेवोपहारः उपायनं यस्मै तथो

जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपैर्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः । हर्म्येष्वस्याः
कुसुमसुरभिष्वध्वखेदं नयेथा लक्ष्मीं पश्यन् ललितवनितापादरागांकितेषु ॥ ३६ ॥ ॥ श्री ॥ ॥ ॥

उ

॥ क्तौपायनमुपहारमुपहारस्तथोपदेत्यमरः कुसुमैः सुरभिषु सुगंधिषु ललितवनिताः सुंदरस्त्रि यः ल
लितं त्रिषु सुंदरं इति शाश्वतः वनितासां पादरागो यावकरसस्तेनांकितेषु चिह्नितेषु हर्म्येषु धनिकभवनेषु ॥
अस्या उज्जयिन्या लक्ष्मीं पश्यत् अधुनाध्वगमनेन खेदं नयेथा अपनय ॥ ३६ ॥ ॥ श्री ॥ ॥ ३६ ॥ ॥

नार

मे॰ टी॰ २८

भर्तुः स्वामिनो नीलकंठस्य भगवतः कंठस्येव छविर्यस्येति हेतोर्गणैः गणाः स्कंदादयस्तैः सादरं सप्र
मथेक्षय इति शेषः आलोकेन सादरं पश्यता यावीक्ष्यमाणः सन् प्रियवस्तुसाहचर्यादपि प्रियत्वं भवेदिति भावः
त्रयाणां भुवनानां समाहारस्त्रिभुवनं तद्धितार्थेत्यादिना समासः पात्रादिभ्यः प्रतिषेधो वक्तव्य इति वक्तः
त्रयाणां भुवनानां समाहारस्त्रिभुवनं तस्य गुरोर्लोकानां पितुश्चंडीश्वरस्य कात्यायनीवल्लभस्य पुण्यं पा
वात्स्थानं लिंगमाप्रति बेधः त्रिभुवनस्य गुरोर्लोकानां पस्य चंडीश्वरस्य लोट् प्रयस्तरत्वात्सर्वं यायागेन यामिति भावः
वनं धाम महाकालाख्यं यान्तत्र स्थानं यायाः गच्छ विध्यर्थे लोट्

भर्तुः कंठच्छविरिति गणैः सादरं वीक्ष्यमाणः पुण्यं यायास्त्रिभुवनगुरोर्धाम चंडीश्वरस्य धूतोद्यानं
कुवलयरजोगन्धिभिर्गन्धवत्यास्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥ ३७ ॥ ॥ श्री

उक्तं च स्कांदे अवंत्याखंडे आकाशे तारकालिंगं पाताले हाटकेश्वरं मर्त्यलोके महाकालं दृष्ट्वा काममवाप्नुयादिति तेन
केवलं मुक्तिस्थानं किंतु विलासस्थानमपीत्याह धूतेति कुवलयपरजोगंधिभिरुत्पलपरागगंधवद्भिः तोयक्र
क्रीडास्तु निरतानामासक्तानां युवतीनां स्नानीयेन चंदनादिना कलुषितस्नानीयेन भिषवे स्नाने पिप्पादवः
तेन तिक्तैः सुगंधिभिः कटुतिक्तकषायास्तु सौगंध्येपि प्रकीर्तिता इति हलायुधः सौगंध्याति शयार्थेवि
शेषणं हृद्यं गंधवत्या नाम नद्यास्तत्या या मरुद्भिर्मारुतैर्धूतोद्यानं कंपिताक्रीडमिति भास्तोविशेषणं ॥ ३७ ॥ राम
२८